# Shri Haradattacharyavarya Mahimnastavah

# શ્રીહરદત્તાચાર્યવર્યમહિમ્નસ્તવઃ

## Document Information

Text title : Shri Haradattacharyavarya Mahimnastavah

File name : haradattAchAryamahimnastavaH.itx

Category : deities_misc, gurudev, stava

Location : doc_deities_misc

Proofread by : Brahatha Mohan

Latest update : July 9, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2026

*sanskritdocuments.org*

# શ્રીહરદત્તાચાર્યવર્યમહિમ્નસ્તવઃ

॥ અથ મહામન્ત્ર ધ્યાન શ્લોકાઃ ॥

॥ ઔં નમો ભગવતે હરદત્તાય ॥

ઓંકારવેદ્યવિભવસ્ય મહેશ્વરસ્ય
સઞ્ચોદનેન શિવતત્વનિરૂપણાય ।
ભૂમિં ગતં મધુહરં ભુવિ યં વદન્તિ
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૧॥

નન્તવ્યમેકપુરુષં શિવમેવ નાન્યં
મન્તવ્યમેકમનુમીશ ષડક્ષરી યઃ ।
ગન્તવ્યમાહ શરણં ચ પતિ પશૂનાં
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૨॥

મોક્ષં દદાતિ ભગવાન્પરમેશ્વરોઽન્યે
મોહાત્ ભ્રમન્તિ દિવિજાઃ ભવપાશબદ્ધાઃ ।
ઇત્યં પ્રમાણ સહિતં ય ઉપાદિદેશ
તસ્મૈ નમો ભગવતે હરદત્ત ભૂમ્ને ॥ ૩॥

ભસ્મત્રિપુણ્ડ્રવિલસદ્રમણીય ગાત્રઃ
રુદ્રાક્ષરત્નમણિમિર્વિલસત્સુકણ્ઠઃ ।
શ્રૌતાગ્નિસેવનપરશ્શિવપૂજકો યઃ
તસ્મૈ નમો ભગવતે હરદત્તભૂને ॥ ૪॥

ગમ્ભીરસૂક્તિનિચયૈઃ શ્રુતિયુક્તિયુક્તઃ
પારમ્યમૈશમમલં પુરતો ઇરેયઃ ।
પીઠેસ્થિતોઽનલમયે પ્રકટી ચકાર
તસ્મૈ નમો ભગવતે હરદત્તભૂને ॥ ૫॥

વન્ધ્યશિશવોહ્યમિનયો ભરતોક્તયા યત્

મૌલિસ્થહસ્તયુગળાઞ્જલિમુદ્રયાऽસ્ય ।
ઇત્યાદિ યુક્તિજટિલં ય ઉદાજહાર
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૬॥

તેને હિ યો નિરુપમાં શ્રુતિસૂક્તિમાલાં
યાં વીક્ષ્ય જિમતયઃ સહસા પતન્તિ ।
નિષ્પક્ષપાતહૃદયાઃ સતતં રમન્તે
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૭॥

હંસોપસેવ્યઘઠનપ્રભવામ્બુપૂર્ણ
કંસાભિષે પુરવરેત્વનલેશપૂતે ।
આવિર્બભૂવ શિવભક્ત સુદર્શનો યઃ
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૮॥

રમ્યોરસચ્યુતવતી કમલાં હરેર્યઃ
શ્રી સુપ્રતીકતનયાં પતિમાપ્તુકામામ્ ।
જ્ઞાવા સુધીઃ સ્વગૃહણીં વિધિનોપયેમે
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૯॥

દર્પં જહાર કુધિયાં શિવવૈરિણાં યઃ
હર્મ્યં પુપોષ સુહૃદાં શિવમાશ્રિતાનામ્ ।
શૈવં ચકાર સમયં પ્રતિબન્ધમુક્તં
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૧૦॥

તાપત્રયાગ્નિ શમનૈક સુધાકરાય
મોહાન્ધકાર હરણૈક દિવાકરાય ।
માહેશબોધ જનકાય મહામહિમ્ને
તસ્મૈ નમોસ્તુ ભવતે હરદત્તભૂમ્ને ॥ ૧૧॥

યસ્યાપદાનમતુલં વિતતં ભવિષ્યે
ભક્તોપમન્યુમુનિના દ્વિજવર્યમધ્યે ।
ગીતં પુનઃ શિવરહસ્યનવાંશકે ચ
તસ્મૈ નમોસ્તુ ભવતે હરદત્તભૂચે ॥ ૧૨॥

ભૂમા શિવસ્સુકૃપયા વટમૂલવાસી
હ્યારાદુપેત્યપદમાશ્રિતબાલકાય ।
નૈજં પ્રબોધમમૃતં પ્રદદૌ ચ યસ્મૈ

તસ્મૈ નમોસ્તુ ભવતે હરદત્તભૂમ્ને ॥ ૧૩॥

શ્રીકણ્ઠ દિવ્યમહિમાવળિબોધિની યા
બર્થરનભરિતા શ્રુતિસૂક્તિમાલા ।
યેનૈવ સા સુઘટિતા વિદુષાઽસમેન
તસ્મૈ નમો ભગવતે હરદત્તભૂમ્ને ॥ ૧૪॥

શ્રી કામકોટિપીઠેશકરુણાલેશલેશતઃ ।
અકાર્ષીદક્ષિણામૂર્તિઃ હરદત્તગુરુસ્તવમ્ ॥ ૧૫॥

ઇતિ શ્રીમલ્લાદિદક્ષિણામૂર્તિવિરચિતઃ શ્રીહરદત્તાચાર્યવર્યમહિમ્નસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Brahatha Mohan

*Shri Haradattacharyavarya Mahimnastavah*
pdf was typeset on July 9, 2026

Please send corrections to *sanskrit@cheerful.com*